मानससन्देशम्

पण्डितदिगम्बरमहापात्रः

45.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मानससन्देशम्

परमपूज्यानां प्रो० सत्यव्रतशास्त्रिपादानां
करकमले सविनयं समर्पये —
दिगम्बरमहापात्रः
४-१-९७

रचयिता—

पण्डितदिगम्बरमहापात्रः

साहित्याचार्यः, एम०, ए०, बि० एड्०
राष्ट्रभाषारत्नम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रचयिता — पण्डित दिगम्बरमहापात्रः
घर न० ए/३९९, कोयलनगरम्
पो०—राउरकेला—७६९०१४
उत्कलः

स्थायी सङ्केतः — ग्रा० पुरुणापाणि
पो० कलापत्थर
जि० कटक (उत्कलः)

प्रकाशकः — श्री उमेशचन्द्रः महापात्रः
द्वारा — पण्डित दिगम्बरमहापात्रः

© — सर्वेऽधिकाराः लेखकाधीनाः

प्रथम संस्करणम्—१९८८

प्रति १०००

मूल्यम् रु० १२ मात्रम्

वितरक — मोतीलाल बनारसी दास
चौक, वाराणसी—२२१००१

मुद्रक — केशव मुद्रणालय
खजुरी, वाराणसी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

FOREWORD

The Manasasandesa of Pandita Digambara Mahapatra is a brilliant piece of poetry in the traditional Sandes a form of Sanskrit literature. The tradition started by the great Kalidasa in his immortal Meghaduta has been a living one, and a great number of poets have made notable contributions to enrich the form over the ages. Pandita Mahapatra, it is gratifying to note, has successfully carried forward the same poetic tradition in his short and sweeet composition. The Manasasandesa is thus a remarkable lyrical piece in Sanskrit of the present generation.

There is a considerably big lobby of so-called intellectuals which considers that Sanskrit is a dead Language. We however fail to appreciate this view on the simple ground that it is lop-sided; Apart from anything else, this one piece of lyrical poetry is sufficient enough proof to prove that the language is not only living but is capable of being the vehicle of varied emotions. No language can be termed 'dead', in our opinion, if it is in use for creative writing. The Manasasandesa provides the latest evidence of the life-force of the age-old language of India.

The lyric takes the form of a journey of the poet's mind personified as a swan (manasa-hamsa) over the entire northern India. The Poet, hailing as he does from Orissa, starts his mental journey from Puri, the Sri-ksetra onward to the Manasa lake, beyond the Himalayas. The mind-swan of the poet wends its way through Konarak, the lake of Chilka, Bihar, Prayag, Agra, Delhi, Srinagar, the Kailasa mountain and reaches the lake of Maaasa the famed abode of swans. Here at the lake, a dialogue between the swan and his lady-love brings the poem to its end. Pandita Mahapatra

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

is a finished poet and his diction is sweet and simple. There is happily no regionalism in the Sanskrit utilised. His description of different places has been well executed in appropriate metres on which also the poet has a complete mastery.

Though the form is old, the ideas of the poet are refreshingly modern. He does not hesitate to eulogise the achievements of the Mugal rulers side by side with those of the Hindu emperors. The idia of national integration finds a fine expression in the depiction of Kashmir :—

वसन्ति मुप्लीमजना अनेकशः
क्वचित् क्वचिद् वाऽधिवसन्ति हिन्दवः ।
द्वयोर्वरेण्या वरिवर्ति संहतिः
स्थितिर्हि काश्मीरभुवो महीयसी ॥

Similarly, the dialogue of the swan with his lady-love shows up the poet's assessment of the national situation. The swan relates his own impression of the country to his beloved and is rightly unhappy over the plight caused by deterioration in the standards. The form and content of this conversation are not only charming but unique as well.

Pandita Mahapatra's composition is simple but elegant. I have no doubt that the entire poem will be liked by the lovers of Sanskrit poetry.

I would like to refer to another aspect of the poet's talent. The two drawings of the swans in this poem are executed by the poet himself, and prove his mastery over this form of art as well.

I congratulate Pandita Mahapatra on his achievement and earnestly hope for its appreciation by the lovers of Sanskrit poetry.

Dr. Biswanath Bhattacharya
Professor of Sanskrit,
Banaras Hindu University.

Varanasi.
5.12.87

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिवङ्गताया मदीयमातुः "सूर्यमणि" देव्याः कृते

समर्पणम्

मातस्ते हृदयं कियद् वत महत् स्नेहामृतैः पूरितं
मन्ये वा श्रुतकीर्त्ति मानससरो हृद्यं बभौ मे कृते ।
स्मृत्वा तत् प्रहिणोमि तत्र विहगप्रायं मदीयं मनः
क्वासि त्वं प्रहितं गृहाण जननि ! वन्दार्विदं साम्प्रतम् ॥

स्मारं स्मारमपारास्थाः स्वमातुश्चरणाम्बुजे ।
प्रणम्य शिरसा भक्त्याऽर्पयेऽहं कविताञ्जलीः ॥

तव पुत्रः,
दिगम्बरः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुरोवाक्

बहुभावभूयिष्ठस्य दुर्निग्रहस्य मनसो नियन्त्रणं दुष्करमपि वाचंयमानां योगिनां पक्षे कथमपि संसाध्यं भवेच्चेत् तत् सर्वथा श्रेयः। परं वाग्-देवतायाः श्रीचरणमुपचर्य तद्भूतिजाते जातहार्द्दानां कविकिङ्कराणां कृते कथं च तद् ग्राह्यम्? इतस्ततश्च परिदृश्यमाने प्रकृतिमनोहरे परिवेशे सदा बद्धानुरागाणां भावाकृतजीविनां तेषां मानसनिग्रहः कुतो वा श्रेयान्?

प्रायेण हि काव्य-प्रबन्ध-रचनाप्रसङ्गेऽलौकिककल्पनाविलासिनः कवे-र्मनः सर्वथाऽनितरसामान्यतया लौकिकविधिनिषेधयोर्नियतपरिधिमध्ये नैवावध्यते। नियन्त्रणाद् वहिर्विलसति तच्चतुर्दिशम्, "कवयः क्रान्त-दर्शिनः", कवयः किं न पश्यन्ति, "यथास्मै रोचते विश्वं तथेदं परिवर्त्तते" इत्यादि सूक्तिभिर्यत्र प्राज्ञाः कवीनां विशदं रुचिवैचित्र्यमनुमोदयन्ति, यत्र च पुनः स्वच्छन्दं कविमानसं स्वभावतो मुक्ताकाशे बिहङ्गवत् समन्तात् सञ्चरितुं सदाऽभिलषति, तत् कथमेकत्र तावन् निगृहीतं स्याद् वा?

काव्यकृतौ कवेर्मनोवृत्तिः प्रायशो द्विविधा जायते—अन्तर्मुखी वहि-र्मुखी चेति। क्रान्तदर्शी कविः प्रथमं रूपजातं वहिर्दशं दर्शं मनसि बस्तु रहस्यं तथैव समुपजोषं समाहर्त्तुं प्रवर्त्तते, यथा वियति स्वैरसञ्चारी वलाहको वारिवर्षात् पूर्वं वारिधेः पृषन्त्याददानो निर्वाधं प्रसरति। तदनन्तरं चासौ स्वतः स्वीयप्रतिभास्फुरणवेलायां निविष्टचित्तः सन् तदखिलं समुपकल्पितं भावविलासं स्वानुभूत्यनुसारेणैव रहो विरचयति। सुतरां विभोः सृष्टिप्रपञ्चे निसर्गसुन्दरं विचित्रं रूपसम्भारं सुचारु चरितादिकं वा वर्णयितुं कविमानसं सुनियन्त्रितरूपेण यद्येकनिष्ठं सत् स्वतः प्रवर्त्तते, तर्हि तदतितरां श्रेय इत्यवधार्यम्। अत एवोक्तम्—

"प्रवर्त्तते मे मन एव नित्यशो
निसर्गरम्याः प्रति रूपसम्पदः।
तदेव दिव्यं रुचिवोधवर्धितं
विभोः स्वरूपं रमणीयमेव हि॥"

—मानसम्। श्लो० ६।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तीर्थाटनद्वारा "देशाटनं पण्डितमित्रता "चेत्यभिप्रायं चरितार्थयितुं बहुदिनतो मे मनसि बलीयानाग्रह आसीत्। क्रैस्त १९८२ तमेऽब्दे ग्रीष्म-तविवोत्तरभारतस्य कतिपयानां प्रमुखस्थानविशेषाणां दर्शनं समाप्तम्। परं बहुदिनानि यावत् सैव स्मृतिर्विशेषतः काश्मीरभूमेः प्रकृतिमनोहरः प्रतिच्छविर्मनोमुकुरे मे बारम्बारं समदृश्यत। एतदप्यनुभूयत यत् पूर्वजन्मा-र्जितं किमप्यनिर्वचनीयं मे जीवनसर्वस्वं तत्र किन्नु सुरक्षितं चिरादाहो-स्विदपहृतं वेति ? चिररुचिरायास्तुषारभूमेस्तस्या गुणप्रशंसामाचरितुकामः को नाम काव्यानुरागी तत् कथं वा विस्मरेत् ?

सम्भवतस्तत्रत्यानितरसाधारणताहेतोः काश्मीरो लोकमुखे सर्वत्र भूस्वर्ग इत्युच्यते, प्रकृतिसृष्टानि नानापुष्पमण्डितान्युपवनानि, अयत्नलब्ध-प्रसराः सरोवराः, निरन्तरस्खलज्जला गिरिनिर्झराः, अभितोऽनतिदूरे प्रविराजमाना उत्तुङ्ग-शुभ्रशरीरा हिमालयाश्च पार्थिवमप्येतत् सर्वं कस्य वा मनस्याह्लादमयं स्वर्गीयं चैतन्यं न सञ्जनयेत् ? अथवेदृशो दिशान्त-प्रसारिणी सुमनोहरा निसर्गरूपसज्जा निरस्तरागमपि कं किल कविकर्म-धूर्धरं सलीले सरसप्रबन्धप्रणयने न नितरां प्रचोदयेत् ? तत्र यथा—

"वदन्ति भूस्वर्गं इतीदमुत्तमं
स्थलं ऽशंसास्पदमेव सत्यतः।
उदारबोधाः कविराजराजयः
पुरा हि निन्युर्महनीयतामिदम् ॥
—श्रीनगरम् श्लो० २।

अशेष-सौन्दर्य-विमुग्धचेतस-
श्चिराय मे चेद् भवितेह संस्थितिः।
अथोत्तमं वा किमतः परं वद
क्षणक्षयि-क्षोणितलेऽथवा सखे ! ॥
—श्रीनगरम् श्लो० २५।

न केवलं काश्मीरः, तदुपरि च पुराणप्रसिद्धः कैलासपर्वतोऽपि संशोभते। पुनश्च मानसं सरः, यस्य भूरिशः प्रशंशाः प्राचीनेषु काव्यशास्त्रेषु पूर्वसूरिभिः कृताः सन्ति। "तत् सौन्दर्यं किम्प्रकारं भवेत्, कथं नु तद् द्रष्टव्यं चेति कल्पनाऽऽकुलितस्य चेतसो मुहुरान्दोलनाद्धेतोः समुपकल्पितानां तत्तत्स्थलविशेषाणां संदर्शनाय काव्येऽस्मिन् मदीयं मनोविहगं मानसं सरः प्रहितुकामस्य मे "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" इव प्रयासो जायते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विविधस्थानदर्शनेन स्वभावतोऽभिनवाः सद्योभावाः समुद्भवन्ति। विहङ्गमदृष्टिपातेऽपि समासेन स्थलविशेषाणां मूल्यबोधः सहृदयैः सर्वथा समुपलभ्यते। यतस्तत्राप्यस्ति चुम्बकवत् काप्यनिर्वचनीयाऽन्तराकर्षण-शक्तिः सहृदयहृदय-निग्रहणाय सम्मोहनमन्त्रश्च। वस्तुतस्तत्स्थानीय-मालेख्यं कथं तावत् केन कलानुरागिणा काव्यरसिकेन कविनोपेक्षणीयं स्याद्वेति।

काव्ये क्वापि तिर्यग्जातीयेषु प्राणिषु मानवीय-गुणदेषारोपः परम्परा-गत एवास्ति। विशेषत इदानीन्तने कुटिले समाजे विजातीय-जीविका-भाजां जनानां चरित्रचित्रणं हंसयोर्मुखेन काव्येऽस्मिन् प्रसङ्गप्रवाहतो विहितमस्ति। विषयानुपूर्व्या नदीपर्वतादीनां च संवेदनशीलता तयैव दिशाऽवधारणीयेति दिक्।

परिकल्पितोऽसौ मनोविहगो न केवलं भूस्वर्गे काश्मीरे अपितु किञ्चिद् दूरे विराजमाने रजताद्रिवर्ये तथा निर्जने मानससरोवरे विहरन् सदाऽऽपरि-तोषं मोदताम्, अवशेषे च तत्रैव सरसि सानन्दं सन्तरन् बुद्बुद्विलायं विलीयमानो भवत्विति बुद्ध्या प्रबन्धोऽयं सनिर्वन्धमुपनिबध्यते। अत एवोक्तमस्ति—

"शरीर-नीहार-शिलोच्चये किमु
प्रशस्त आस्ते हृदयह्रदोऽप्ययम्।
निमज्ज रे मानसहंस! सादरं
सुखी न को वा भवितेह मानसे"॥

—मानसं सरः श्लो० ३०।

अपरञ्च प्रतिपाद्ये काव्यनिबद्धविषयेऽस्मिन् परमात्मना सह जीवात्मनः संयोगरूपोऽपरोऽप्यर्थो व्यज्यते। मानसहंसोऽत्र जीवात्मा, य इहलोक-परलोकगामी कर्त्ता भोक्ताऽभिमानी धर्माधर्मसाधनः सुखदुःखादिमान् संसारी भवति। मानसहंस्यत्र सर्वान्तर्यामी परमात्मा, यः कूटस्थनित्यो निरालम्बः सन् प्रतिभाति। एकः सगुणः, अन्यश्च निर्गुणः। एकस्य भोगो नेतरस्य। एतयोः शारीरपरमेश्वररूपिणोर्हंसयोरेकत्र मानससरोवरे सम्मेलनरूपोऽर्थः सर्वथा प्रणिधेयोऽस्तीति दिक्।

काव्यस्य नामसार्थकतैवमेव जायते। मनस इदं मन एव वेति अण् प्रत्यये मानसम् – मनः, हृदयम्, मानसं सरश्च। कैलासपर्वते स्थितम् इदं महत् पवित्रं मानसं सरो राजहंसानां जन्मभूत्वेन प्रसिद्धमस्ति। अत

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एव मानसस्य अयं मानसाज्जातो वेति मानसः = राजहंसः मनोगतः सन्देशश्च। तम् अधिकृत्य कृतं यत् काव्यं तत् "मानससन्देशम्" इति काव्यस्य नाम सुविहितमस्तीत्याशयोऽवधेयः।

कृतज्ञताज्ञापनम्—

काव्येऽस्मिन् वनारसहिन्दुविश्वविद्यालयीय—संस्कृतविभागस्य प्राचार्यवर्याः डा० विश्वनाथभट्टाचार्यचरणा वैदुष्यमण्डितां भूमिकां विरच्यातितरां मामनुगृहीतवन्तः सन्ति। एतदर्थं तेषां विदुषां सुचिरोपकारं स्मारं स्मारं तेभ्यः भूरिशः कृतज्ञताः समर्पयामि। ये खलु शुभानुध्यायिनः पण्डितमार्तण्डाः स्वस्वशुभाशंसाभिः काव्यस्यास्योत्कर्षतां विद्योतयन्ते, तेभ्योऽहं हार्दमाभारमर्पयेतराम्। वाराणसीस्थ-सार्वभौम-संस्कृतप्रचारसंस्थानस्याध्यक्षैराचार्यवर्यैः पण्डितवासुदेवद्विवेदिशास्त्रिचरणैः काव्यस्य प्रकाशनार्थमत्रागतं मां सोदरवत् स्वसंस्थाने संस्थाप्य कृपया सर्वविधं च सौविध्यं प्रविधाय संस्कृतभाषाजनन्याः सार्वभौमसौहार्दं साक्षात् सफलीकृतमस्ति, तदर्थं तेषामुपकारभारमावहन्नहं कोटिशः कृतज्ञताः प्रकटये। मदीया मित्रवरा डॉ० कपिलदेवपाण्डेय-शिवजी उपाध्यायप्रभृतयश्च ये शुभानुध्यायिनः काव्यस्य प्रकाशनसाफल्याय सम्यक् दिग्दर्शनं प्रदाय मामुत्साहितवन्तः सन्ति, तेभ्योऽहं सप्रश्रयं साधुवादान् समर्पये। पूज्यैः पण्डितवर्यैः श्रीमद्भिर्जनार्दनपाण्डेयमहाभागैः काव्यस्य सुष्टुमुद्रणाय यत्साह्यं सुविहितमस्ति, तदर्थं चाहं तेषां महोदयानामानृण्यं प्रकटयामि। तथापि यदि कुत्रापि प्रमादः स्यात्तर्हि सुधीभिः "गच्छतः स्खलनं क्वापीति" धिया प्रविचार्य पठितव्यमिति प्रार्थये। शम् इति।

विदुषां विधेय,

दिगम्बर महापात्रः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुभाभिशंसनम्

परम्परा या कविकालिदासत -
श्चिरेण काव्येऽनुपमा प्रतिष्ठिता ।
प्रभूतदूताभिधकाव्यलेखनैः
प्रचाल्यतेऽद्यापि नु सा कवीश्वरैः ॥
मदीयमित्रप्रवरेण संस्कृत -
श्रिया महापात्रदिगम्बरेण च ।
परम्परां तामनुसृत्य निर्मिता
कृतिः किलैषाऽभिनवा मनोहरा ॥
अनेन काव्येन गृहेऽपि तिष्ठता
समग्रदेशस्य परिस्थितिः समा ।
सुखेन काव्यामृतपानजन्मना
सहैव द्रष्टुं विबुधेन शक्यते ॥
क्वचिद्दिशासु क्वचिदम्बरे पुन -
र्विहङ्गतुल्यं भ्रमयन् स्वपाठकान् ।
रसं महापात्रमितं च पाययन्
कविर्निजं नाम चकार सार्थकम् ॥
इदङ्कृतौ - वर्णित - हंस - दम्पती
यथोषतुः सम्मिलितौ मुदा चिरम् ।
तथैव जीवात्म-परात्म-सङ्गमः
सदैव जायेत भवस्य भूतये ॥

३०-११-१९८७

सार्वभौमसंस्कृतप्रचारसंस्थानम्,
वाराणसी ।

पण्डितवासुदेवद्विवेदी शास्त्री
सञ्चालकः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पण्डित श्रीदिगम्बरमहापात्रप्रणीत 'मानससन्देशकाव्य'-विषये

शिवानुध्यानम्

औत्कलं कवेर्मानसं भ्राम्यति काव्येऽस्मिन् मानसोत्कमितीयमस्य परमा वैचित्र्यभूमिः। क्व कालिङ्गश्चिचिलिकाह्रदः, क्व च ब्राह्मं हैमवतं सरो मानसम्? कामं भवेन्मानैर्मानवीयैर्दैवीयसी गन्तव्यभूमिः, द्राघीयसी वा यात्रा भौतिकी। किन्तु क ईष्टां बन्द्धुं कविसहृदयाख्यं सारस्वतं तत्त्वं क्षोदिष्ठैर्मानैर्भौमिकैः। निरङ्कुशप्रसारं प्रसारणं हि नैसर्गिको धर्मः कवि चेतसः। तदिदमित्थमाह स्म सोत्प्रासं प्रत्नः कविवृषा भर्तृहरिः—

अभिनव - मदरेखाश्याम - गण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम्।

तत्कथं जह्यात् स्वधर्ममिमं कविब्रुवोऽपि कश्चित्? यदि वा जह्यात्, कथं स्यादसौ कविशब्दभाक्?

किञ्चेदमतिरोहितं सचेतयां यत्, न हि जातु विश्राम्यति कस्यापि कवेर्मानसमर्थेषु क्षुल्लकेषु। अतो मन्यामहे, नितरां युक्तरूपमिदं यदिदं नूत्नतमं सन्देशकाव्यं नवेन पथा सञ्चरमाणं चेष्टते चिलिकाह्रदं मानसीकर्तुम्।

मर्त्यं किल कथमपि दिव्येन युनक्ति समग्रः कविसार्थः। कविप्रतिभा हि नाम सा, या मर्त्यलोकस्थं यद्भद्रं तच्छिनत्ति, यदल्पं तद्भिन्नत्ति, यद् बन्धनं तद् भनक्ति; यद् रम्यं तद् व्यनक्तिः; उदर्के च भुनक्ति भोजयति च साम्राज्यमानन्दभूमोदयस्य। तदाशास्महे यत्पाठकाः सहृदया अप्यस्मिन् काव्ये काव्यसोपानेन कविप्रत्तेन कालिदासीयो दूतमेघ इव उदङ्मुखाः स्वमुत्पतन्तः उत्सर्पिणीं मानसयात्रां विदधानाः प्राप्स्यन्त्यन्त्ये तामेव समुच्छ्रितां दिव्यसौन्दर्यभूमिं मानसीम्।

प्रो० वि० विङ्कटाचलम्
कुलपतिः,
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

वाराणसी,
११-१२-१९८७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुभाशंसनानि

श्रीदिगम्बरमहापात्ररचितं मानससन्देशं सम्यगवालोकि। एतत्काव्यं मेघदूतसरणिमधिकृत्य किञ्चिदभिनवं सन्देशकाव्यम्। संस्कृतकाव्यमनाधुनिकमिति प्रायशो जनैर्निगद्यते। दिगम्बरमहापात्रेण एषा जनोक्तिर्मोघीकृता। कविता न केवलं नूतनान् विषयानधिकृत्य प्रतिभासमुन्मीलिता, अपि तु भारतीयराष्ट्रभावोऽपि सहजया रीत्योद्बोधितः। भाषापि कवेस्तरङ्गायमाना मनो हरति। मानसयात्राप्रसङ्गेन समस्तभारतदर्शनं नूतनमुद्भावनम्। वस्तुतो भारतीयमनस एवमवगाहनं मानसयात्राव्याजेन सम्पादितमिति मानससन्देशकाराः सभाजयितव्याः।

प्रो० विद्यानिवासमिश्रः
कुलपतिः
काशी विद्यापीठम्।

३०-११-१९८७
वाराणसी।

आशीर्वचनम्

दिगम्बरमहापात्र औत्कलः साधु राजते।
बालकाव्यप्रणेताऽयं तदायासोऽभिनन्द्यताम्॥ १॥
हंससन्देशमालक्ष्य चित्तं मोमुद्यते मम।
कृतिर्जीयात् तदीयेयं दूतकाव्येषु सर्वदा॥ २॥

आचर्य बलदेव उपाध्यायः
पद्मभूषणः, भू०पू० संचालकः
अनुसन्धानसंस्थानम्,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

विद्याविलासः,
३७, वी० रवीन्द्रपुरी,
वाराणसी।

शुभाशंसा

काव्यानां रचनेन संस्कृतगिरः सेवां सदा कुर्वतश्चित्रे गीतविधौ च लब्धयशसः सौहार्दभाजश्च मे।
सच्छिल्पोत्कलवासिनो बहुविधाः काम्याः कला बिभ्रतः
शश्वत्काव्यमिदं दिगम्बरमहापात्रस्य राराज्यताम्॥

—इति काम्यते
डॉ० कपिलदेवपाण्डेयः
मन्त्री,
सार्वभौमसंस्कृतप्रचारसंस्थानम्
वाराणसी।

२४-११-१९८७
संस्कृतविभागाध्यक्षः,
आर्यमहिला डिग्री कालेज,
वाराणसी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुभाभिशंसनम्

अन्योक्तिमुखेन विषयवस्तुवर्णनं तावत् प्राचीनभारतीया शैली विद्योतते। भ्रमरगीतमन्योक्तिनिदर्शनम्। दूतकाव्यान्यस्या एव शैल्याः प्रकारान्तराणि विलसन्ति। रामायणे हनूमन्तं महाभारते च हंसं दूतीकृत्य वियोगविधुरायाः कान्ताया अन्तिके प्रेषणं सन्देशकाव्यानामुवजीव्यत्वमावहति। तत्र मेघदूत-रथाङ्गदूत-वायु-दूतादीनि वहूनि खण्डकाव्यानि प्रथन्ते कवीनाम्। प्राचीनकाले प्रियजनाय लिखितः सन्देशो वार्ताहरैः कपोतश्येनादिपक्षिभिश्च प्रहीयते स्म। महाकविकालिदासेन मेघमुद्दिश्य स्वानुभवः प्रकाशितः, यक्षं सन्देशप्रेषकं कल्पयित्वा तन्मुखेन सन्देशव्याजेन सकलराष्ट्रस्य तन्नैसर्गिकरामणीयकस्य च शोभन उपन्यासो विहितः।

अस्यां सन्देशकाव्यपरम्परायाम् उत्कलीयपण्डितप्रवरेण श्रीदिगम्बरमहापात्रेण मानससन्देशकाव्यं प्रणीतम्। न केवलं शब्दचित्रैरखण्डभारतं चित्रितमस्मिन् खण्डकाव्ये, अपि तु चित्रसज्जनया श्रीमहापात्रेण स्वाभाविको भावो मूर्तीकृत आस्ते। तद्रचितानीमानि तत्कलानिदर्शनभूतानि चित्राणीहैव काव्ये संयोजितानि विद्यन्ते पाठकानां परितोषाय। चित्रकलापाटवेन सहैव श्रीमहापात्रमहोदयः संगीतसुधारसपरिवेषणपरायणः समुपास्ते गीर्वाणवाणीं सरस्वतीमहर्निशम्। इयं तदीया साहित्यसंगीतकलात्मिका त्रिपुटी संस्कृतब्राह्मीसमर्चनायामेव सम्पुटीभवतीति श्लाघ्यं पुरस्करणीयमनुकरणीयं च तदीयं जीवनम्।

इह मानसहंससन्देशप्रेषणव्याजेन समग्रभारतवर्षस्य प्रमुखतीर्थस्थलानामैतिहासिकस्थलानां स्वातन्त्र्यान्दोलनभावितभूमीनां च वर्णनया साधु समसाधि श्रीदिगम्बरमहापात्रेण भारतभूभागस्य महिम्ना सार्धमेवाखण्डमालामयं तदीयमैक्यम्। जीवात्मनो ब्रह्म प्रति नित्यो मधुरश्च संबन्धः प्रादर्शीति दर्शनसंस्पर्शपरिमण्डितेन खण्डकाव्येन नूनं सुधीजनाः प्रीणिताः, काव्यप्रियाश्चोपकृताः स्युरिति प्रत्येति।

भैरवाष्टम्याम्
२०४४ वै०
(२६-११-८७ ख्रै०)
वाराणस्याम्।

डॉ० भागीरथ प्रसाद त्रिपाठी "वागीशशास्त्री"
निदेशकः,
अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सूचीपत्रम्

विषयाः	पृष्ठाः
१ मङ्गलाचरणम्	१
२. मानसम्	२
३. श्रीक्षेत्रम्	४
४. अर्कक्षेत्रम्	५
५. चिलिका	६
६. विहारभूमिः	८
७. प्रयागः	९
८. अशोकदुर्गः	१०
९. आग्रा	११
१०. दिल्ली	१३
११. काश्मीर.	१६
१२. श्रीनगरम्	२०
१३. कैलासः	२५
१४. मानसं सरः	२९
१५. काव्यप्रशस्तिः	३७

—:०:—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मानससन्देशम्

मङ्गलाचरणम्

यत् सत्यं प्रतिपादितं कविवरैर्वेदोपवेदोच्चये
वेदान्ते समुदीरितं च यदहो साक्षात्कृतं वा बुधैः ।
ब्राह्मीस्मेर-मुखारविन्द-गलितं पीयूषसारोत्तमं
यद् धीरैरनुभूयते तदखिलं सत्यं परं धीमहि ॥

—:०:—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मानसम्

(१)

मनो ममानल्पकथाः पुनः पुनः
सदैव सङ्कल्पयतेऽनुरागतः ।
न तन्निरोद्धुं प्रभवाम्यहं क्षमो
यदीह किं वा करवाणि भो सखे !

(२)

स्पृहास्ति काष्ठां[1] प्रति यां यदा मनो
मम प्रसह्य प्रति तां प्रधावते ।
अतो हि मन्ये प्रवदन्ति पण्डिताः
सतोऽपि संवेपयते मनो बलि ॥

(३)

मनस्तु मुक्तेः प्रथमं शरीरिणां
निमित्तमस्ति प्रतिबन्धनस्य च ।
जयाजयौ स्तो मनसैव नः क्षितौ
ततो हि तोषाय वदामि किञ्चन ॥

(४)

नियोजयामीदमपारदोहदं
निसर्गसृष्टौ मम मानसं विभोः ।
चलं प्रकृत्या कृतमेव येन तत्
किमस्ति तस्मायधिकं समर्पणम् ॥

(५)

न कल्पते शौरिपदाय मे मन-
स्तथा यथा तद्घटिताय रोचिषे[2] ।
स्फुटं तदाज्ञाप्रहितात्मसम्पदः
स्फुरन्ति भासः प्रकृतौ हि वस्तुतः ॥

---

१. दिशम् । २. प्रभायै, सौन्दर्यायेत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

प्रवर्त्तते मे मन एव नित्यशो
निसर्गरम्याः प्रति रूपसम्पदः ।
यदेव रुच्यं तदपारमङ्गलं
विभोः स्वरूपं रमणीयमेव हि ॥

(७)

विलोकयामीह यदत्र भूतले
तदेव रूपं प्रकृतेर्विराजते ।
स्पृहालु मे तत्र मनो विलीयतां
प्रकाममिच्छामि ततोऽधिकं किमु ?

(८)

ततोऽधिका चेन् मनसः परा गति-
स्त्विषां चयस्तां च धियं प्रचोदयात् ।
वरेण्यमार्या यमुपासते चिरं
स एव भर्गः[1] परितोऽवतिष्ठते ॥

(९)

प्रलुब्धबुद्धिः प्रकृतावहं यदा
निरीक्ष आशां पुरतश्च यां सखे !
जले स्थले विष्णुपदे[2] च सुन्दरे
प्रदृश्यते तत्र पुनः पुनः शिवम् ॥

(१०)

अरे मनस्त्वं मम सारसोपमं
भव प्रयाहि प्रथमं तु मानसम्[3] ।
वसन्ति यत्राप्सरसः सरस्तटे
सहस्रपत्रग्रहिलाः सुमध्यमाः ॥

—:०:—

१. आदित्यतेजः परमात्मेत्यर्थः । २. आकाशे । ३. मानससरोवरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीक्षेत्रम्

(१)

मनः पूर्वं प्रयाहि त्वं श्रीजगन्नाथमन्दिरम् ।
नीलाचल इति ख्यातं यज्जनानां मुखे क्षितौ ॥

(२)

महासिन्धोस्तटे भाति श्रीजगन्नाथ ईश्वरः ।
बलभद्र-सुभद्राभ्यां समं पतितपावनः ॥

(३)

सेव्यतेऽहर्निशं कामं कामपालानुजोऽब्धिना ।
शौरिशुश्रूषया को वा न भवेद् भाग्यवान् भुवि ॥

(४)

स्तूयते जनसङ्घातै-र्भगवान् भक्तवत्सलः ।
नाशाय विपदां साक्षाद् वासाय त्रिदिवे चिरम् ॥

(५)

नमस्कृत्य जगन्नाथं चञ्चलं चल रे मनः ।
बहूनि तीर्थधामानीक्षणीयानि भवन्ति ते ॥

(६)

जगन्नाथाख्यधाम्नोऽस्य दर्शनात् पावनं भव ।
कोणार्कमथ वीक्षस्व स्वराष्ट्र-गौरवोत्तमम् ।

—:o:—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अर्कक्षेत्रम्

(१)

चन्द्रभागा-नदीतीरे तीर्थोत्तममवस्थितम् ।
अर्कतीर्थपदं प्राप्य कृतार्थीकुरु जीवनम् ॥

(२)

वरुणालयवेलायां[1] भाति तद् देवमन्दिरम् ।
ऊर्मिधौतपदं दिव्यं कलाकल्प-कलेवरम् ॥

(३)

नरसिंहवरै[2]-र्वर्यै-र्निर्मितं जलधेस्तटे ।
दर्शितं शिल्पनैपुण्यं संस्कृतिश्च परा भुवि ॥

(४)

हृतवीर्यबलाः सैन्या घोटका[3] भुग्नजानवः ।
भग्ने तु मन्दिरे सर्वे पतन्ति किमु भूतले ॥

(५)

क्व कलिङ्गकला याताः क्व शिल्पिकुलकीर्त्तयः ।
क्व तत्कुड्यकृतं दाक्ष्यं क्व पुरा संस्कृतिश्च सा ॥

(६)

पश्य रे पश्य नैपुण्यमुद्वृत्तं[4] च मनः पुनः ।
बुध्वा तद् गौरवं सर्वं याहि त्वं चिलिकाह्रदम् ॥

—:o:—

---

१. समुद्रकूले ।
२. लाङ्गुलानरसिंहनाम्ना उत्कलीयनरनाथेन विश्वविख्यातं कोणार्कं नाम देवमन्दिरं निर्मितम् । ३. भग्ना अश्वमूर्त्तयः । ४. अवशिष्टम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चिलिका

(१)

'चिलिका'[1] सुमनोहरो ह्रदो
हरते यो हृदयं शरीरिणाम् ।
बहुनौनिवहैर्विहङ्गमैः
कृतकिम्भूतरवैश्च सन्ततम् ॥

(२)

प्रवहन्त्यनिलेन संयताः
सलिले वारिरथाः[2] शनैः शनैः ।
किमु भान्ति सुनीलपुष्करे
बहवो देवरथा मनोहराः ॥

(३)

वणिजोऽथ दिगन्तयात्रिका
विलसन्ति व्यवसायबुद्धयः ।
सततं खलु सर्वतोमुखे[3]
ननु यात्रा न कथं सुखावहा ॥

(४)

समयः क्व गतो यदा बभौ[4]
सकलत्रो विद्धन् गतागतम् ।
चिलिकास्ति निदर्शनं च सा
नृपतिः पारिकुदस्य[5] पारगः ॥

(५)

कलरावमुखाः पदे पदे
प्रतरन्तः प्रचुराः पतत्रिणः ।
प्रतिबिम्बितमूर्त्तयः स्वयं
बहुरूपा इव भान्ति पुष्करे[6] ॥

---

१. उत्कलेषु "चिलिका" नाम विख्यातो रमणीयो ह्रद एकः समुद्रतटे शोभते ।
२. नावः । ३. जले । ४. शुशुभे ।
५. चिलिकाह्रदस्य मध्ये पारिकुदनाम द्वीपमेकं विद्यते । ६. जले ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

घननीलजले च सारसाः
कलहंसा वरटास्तथेतरे ।
रतिसारसुखा द्वयं द्वयं
रममाणा विहरन्त्यनारतम् ॥

(७)

बहिराहृतवृत्तवैभवा
बहुवर्णा विहगा[1] विलक्षणाः ।
विचरन्ति विचित्रवाशिताः[2]
शकुनाः सन्ति हि मुक्तबन्धनाः ॥

(८)

क्व नु पत्ररथा[3] विदेशिनः
क्व कलिङ्गेषु समुद्रजो ह्रदः ।
दिवि सञ्चरतां विहायसां[4]
किमिहागोचरमस्ति भूतले ॥

(९)

किमु भारतमातुरुत्तरा
शिरसीह प्रतिभाति मानसम् ।
चिलिका चरणानुजीविनी
भवतीवाविरतं च दक्षिणा ॥

(१०)

अथवाब्धिकृतैः प्रमार्जनैः
स्खलितं मातृपदोदकं स्थितम् ।
ध्रुवमत्र विहङ्गमैरपि
ह्रदरूपं बहुभिर्विशिष्यते ॥

---

१. विविधा विहगाः कदाचिद् बहिर्देशादपि आगत्य चिलिकायां निवसन्ति ।
२. विविधशब्दाः । ३. विहगाः । ४. पक्षिणाम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(११)

त्वं मे मनोऽसि नभसङ्गमवद् विमुक्तं
मुक्ते द्युनि[1] द्रुततरं ड्यनं विधेहि ।
दृश्यानि तानि भवता सुमनोहराणि
स्थानानि जन्मभुव एव हि याहि याहि ॥

—:०:—

विहारभूमिः

(१)

बुद्धो विहारविषयेऽजनि यत्र पूर्वं
तद्धर्मधामनिवहः खलु दर्शनीयः ।
अद्यापि तानि बहुशः पृथुपत्तनानि
ख्यातिं भजन्ति तदनुग्रहपारितानि ॥

(२)

या धर्मराजकथिता[2] वत धर्मनीति-
र्विश्वं पुरा प्रचरिता परितोऽतिहृद्या ।
दृष्ट्वा तदीय-पदपङ्कजचिह्नितानि
स्थानानि तानि नितरामवयाहि याहि ॥

—:०:—

---

१. दिवि । २. महात्मना बुद्धेन कथिता ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रयागः

यो भारते प्रविदितः खलु तीर्थराजो[1]
मान्योऽस्ति मोक्षपदवेः प्रतिहारतुल्यः ।
धामान्तरेण ननु तत् क्व पुनर्विमुक्ति-
र्लभ्येत चेद् वद सखे ! भुवि धर्मधीभिः ॥

(२)

तिस्रो मिलन्ति सरितः परिपूततोया
गङ्गा त्विषाम्पतिसुता[2] च सरस्वती च ।
तद्धाम मानसखग ! प्रणम प्रकामं
यत्रोढनैकयुग - संस्कृति - सम्प्रदायाः ॥

(३)

वृन्दावनेन्दु - सम - नन्दसुतस्य नित्यं
स्नानेन संप्रकटते यमुना सुनीला ।
गोपाङ्गना-स्तन-निमज्जन-लब्धरागा
या सा सखे ! कथमहो मनसो विवर्ज्या ॥

(४)

आसाद्य जह्नुतनया कमलं[3] तदीयं
नीलं कलि-प्रणय-पाश विनाशदक्षा ।
संसेव्यते तत इहातितरामधिश्री-
र्दिव्येन को हि पयसा न सुखी भवेद् वा ॥

(५)

दृष्ट्वा दुरध्व[4]मसतां धन-मानभाजां
संलीयतेऽस्फुटदशेव सरस्वती या ।
सा तत्र सङ्गमपदे कथमीक्ष्यते वा
मिथ्याप्रपञ्चकुशलैः कलिकालभक्तैः ॥

---

१. तीर्थश्रेष्ठ प्रयागः ।
२. यमुना ।
३. जलम् ।
४. असन्मार्गमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

योगे प्रयुक्तमनसां यतिपुङ्गवानां
भोगैकवैभवधियां परिवारभाजाम् ।
सर्वैकसेव्य इति तीर्थवरः प्रयागो
भातीव केवलमिह ह्यपवर्गमार्गः ॥

(७)

देवा वसन्ति खलु सङ्गम एव यस्मिन्
नित्यं प्रशस्तमतयः पितरस्तथान्ये ।
तस्मिन् पवित्रसलिले क इहास्ति वन्धो !
यो नाम ना[1] न हि लषेदवगाहनाय ॥

(८)

पवित्रतोयेऽपि च सङ्गमस्थले
वसन्ति देवा इति धीमतां मतम् ।
अतस्त्रिवेणी-मिलनेऽवगाहनं
सुरालये श्रेय इवोपलभ्यते ॥

—:०:—

अशोकदुर्गः

(१)

हेऽशोकदुर्ग[2] वद किं कुरुषेऽतिवेलं
स्थित्वा कलिन्दगिरिराजसुतातटे त्वम् ।
स्रष्टा तव क्व च गतः क्व च शासनं तत्
किं तेन मङ्गलधियात्र चिरं विसृष्टम् ॥

(२)

मन्ये सुगुप्तधनमावहमानकालाद्
गर्भे त्वया निहितमुच्चपरम्परायाः ।
एतद्धि संस्कृति-निधिश्चिरमस्मदीयो
वर्वर्ति सर्वकुशलाय किमूपजीव्यः ॥

—:०:—

१. नरः । २. यमुना कूलेऽवस्थितः प्राचीनो दुर्गः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA



याहि प्रकाममय मानसराजहंस !

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आग्रा

(१)

याहि प्रकाममथ मानसराजहंस !
तत्रैव यत्र यमुना सरिदस्ति रम्या ।
किम्वा वदानि तदपूर्वतटानुभावं[1]
मुस्लीम-शासन-पदाङ्कित-दुर्गसौधम् ॥

(२)

आग्रेति नाम नगरी रमणीयवेशा
वर्वर्ति सर्वनगरी-निकषायमाणा ।
नाना दिगन्त - जनमेल - चलद्विकाशा
नासाविवेतरपुरी भुवनेऽप्रधाना ॥

(३)

मुस्लीम - राजकुल - कीर्त्तिकलापसारं
विश्वेऽस्ति ताजमहलं महिमान्वितं यत् ।
तत्-सौधसम्भव इहास्मदुपाक्ष[2]मेव
सौख्याय हन्त किमतः परमस्ति भूयः ॥

(४)

किम्वा वदानि वद कुत्र कथं तदीयं
चित्रं चराचर-जगद्वलये मिलेद् वा ।
को विश्वसेन्नु वत दर्शनमन्तरेण
तस्यातिरिक्तसुषमां वचसाऽप्रमेयाम् ॥

(५)

धन्या त्वमेव ममताज[3] ! पुरन्ध्रिवर्ये !
धन्या त्वदीयपति-संविहिता च कीर्त्तिः ।
को वावगच्छति न ताममरोपमोग्यां
लोके विशालमहिमोऽपि महोदयोऽपि ॥

---

१. तस्याः यमुनायाः असामान्यतटप्रभावमित्यर्थः । २. समक्षम् ।
३. मुस्लीम शासकस्य शाहजहानस्य राज्ञी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

धन्यश्च सोऽकवर-राजवरो वरीयान्
धन्या तदीयकृति-केतनमेव सिक्री[1] ।
सर्वे जना क्व च समं[2] भुवि विस्मरन्ति
नो विस्मरन्ति महतां किल तां सुकीर्त्तिम्॥

(७)

साश्चर्यमायतमुखाः परिकल्पयन्तो
नैसर्गिक-स्थपतिकर्म भवन्ति विज्ञाः ।
आश्चर्यमित्यभिमतं प्रविधाय भूयो
भ्रान्ताश्च सन्ति परिदृश्य पुनः पुनस्ते ॥

(८)

हन्त प्रभुत्वसहितं खलु राजतन्त्रं
सर्वाधिकार - बहुलीकृत - घोरगर्वम् ।
मिथ्यास्तवैरविरतं परिवृंहितं यद्
विद्येत किं जन-हिताय तदीयभूमा ? ॥

—:०:—

१. मुस्लीमशासकेन अकवरेण निर्मितं फतेपुरसिक्रीनामकं कीर्त्तिमन्दिरम् ।
२. सर्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिल्ली

(१)

प्रयाहि रे मानस मानदायिनीं
स्वदेशिनां शासनभार-वाहिनीम् ।
स्वतन्त्रता-सारनिबन्धिनीं विशां[1]
सदैव दिल्लीं गणतन्त्रवेदिनीम् ॥

(२)

विदन्ति विज्ञा नवदेहलीति तां
स्वराष्ट्रनीतौ परिपक्वबुद्धयः ।
सविस्तरं ते कथयन्ति कारणं
तदीयकीर्त्तेः कतिशो यथायथम् ॥

(३)

वसन्ति तत्र प्रकृति-प्रवर्त्तकाः[2]
प्रधानमन्त्रिप्रमुखाश्च मन्त्रिणः ।
निदेशका[3] नीतिविधायकास्तथा
वदावदा[4] वादविवादजीविनः ॥

(४)

जलस्थलाकाश - विभागवाहिनी-
पतिप्रवर्या वरदण्डधारिणः ।
स्वराष्ट्र - रक्षारिनिवारणैषिणो
रणप्रवीणा निवसन्ति मानिनः ॥

(५)

विराजते लालकिला मनोहरा
नराः समग्रा जगति स्तुवन्ति याम् ।
प्रशस्यते चातितरां कलाकृति-
र्महम्मदीयाऽमलिना महीयसी ॥

---

१. प्रजानाम् ।
२. जननायकाः ।
३. निर्देशकाः (Directors) ।
४. वावदूकाः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

ध्वनि[1]-प्रभा - संप्रविभासितोऽधुना
पुरा प्रसङ्गः परिदर्शितोऽस्ति चेत् ।
सुसंस्कृतैराप्त-परम्परावली
क्षयं प्रयायान् मनसः कथं सखे !

(७)

महाव्यवस्थापकमण्डलं[2] महत्
स्वराष्ट्र - कल्याणकरं निरन्तरम् ।
विचार्य कार्यं कुरुते दिने दिने
यथातथं तत्र कृते स्वदेशिनाम् ॥

(८)

अनीतिराक्रोशति नीतिमुच्चकै-
रहो वराकीं परिदृश्य भारते ।
इति व्यवस्थापकमण्डलं महा-
रवं करोतीव कदाचिदाकुलम् ॥

(९)

क्वचित् प्रयुक्तं गणतन्त्रशासनं
स्वदेशलोकस्य कृतेऽभिनन्द्यते ।
क्वचिज्जनानां प्रतिहस्त[3]पुङ्गवै-
र्विरुध्यते तन्नृपनीति-कोविदैः ॥

(१०)

क्व राजघाटं[4] प्रविलोक्य दर्शकाः
सभक्ति-पुष्पाञ्जलिमर्पयन्ति वा ।
क्व शान्तिघाटं[5] तृणपुष्पमण्डितं
क्व शस्तवीर्यं विजयं[6] सविस्मयम् ॥

---

१ लालकिलाभ्यन्तरे प्रत्यहमभिनवपद्धत्या केन्द्रशासनस्य प्राचीनेतिहासः शब्दालोकसाहाय्येन (Through light and sound) अभिनीयते ।

२. व्यवस्थापिका संसद् (Parliament) ।

३. राज्यसभा-लोकसभा-प्रतिनिधिवर्यैः ।

४. स्वर्गीय-गान्धीमहाभागानां समाधि-पीठम् ।

५. स्वर्गीयनेहरू-महाभागानां समाधिपीठम् ।

६. विजयघाटम्, (स्वर्गीय-लालबहादुर शास्त्रिमहाभागानां समाधिपीठम्) ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(११)

स्तुवन्ति केचिद् वृषसद्मसन्निभं[1]
सुशोभनं राष्ट्रपते-र्निकेतनम् ।
ध्रुवं हि तद् भोगविलासवेश्मभू:
प्रजापतेर्वा नरवाहनस्य[2] वा ॥

(१२)

प्रशस्यते शाहजहान - पार्थिवो
'जुमा'ख्य-मस्जीद-विधायको[3] महान्।
शरीरमात्रं विगतं तु तस्य तद्
यशःशरीरं चिरमत्र संस्थितम् ॥

(१३)

इत्थं स्वदेशस्य नितान्तमायतं
सदा समृद्धं हृदयं किमु स्थितम् ।
युगे युगे सा नवदेहली महा-
महीश्वराणां प्रतिपत्तिकामिनाम् ॥

(१४)

किं वर्णयानि वद बन्धुवर ! प्रसङ्गे
दिल्ल्या दरादरविराजितविग्रहायाः ।
मन्ये न सा रजतसुन्दरसौधमाला
काम्या न यत्र वसति प्रकृतिद्वितीया[4] ॥

—:०:—

---

१. इन्द्रभवनतुल्यम् ।
२. कुबेरस्य ।
३. 'जुमा' नामधेय-मुस्लीमदेवालयनिर्माता ।
४. प्रकृतिवनिता ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

काश्मीरः

(१)

मनोविहङ्ग ! प्रसर प्रजापते-
र्मनोज्ञ-भूस्वर्गमिहैव[1] सर्जने ।
कविर्महीयान् रसराजविल्हणः[2]
स्वजन्मना यं हि निनाय धन्यताम् ॥

(२)

सदोत्तरस्यां दिशि राजते महान्
नगाधिराजो रुचिरो हिमालयः ।
तदीय-पर्यन्तभुवः सुशीतलं
विभाति काश्मीरमनुत्तमं स्थलम् ॥

(३)

तदुत्तमं स्थानमिति प्रवर्त्तते
मदीयचेतो रमणीयमुच्चकैः ।
क एव जह्याद्धि निसर्गसुन्दरं
दिवौकसामीप्सितमाचिराच्च तत् ॥

(४)

यदीयलोकाः कुसुमेषुसुन्दरा
वसन्ति रम्यासु कटीषु भूभृताम् ।
विराजते हन्त तुषारसंहति-
र्वनस्पतीनां खलु वज्रमौलिवत् ॥

(५)

विशालभृङ्गोपरि शुभ्रमेघवत्
क्वचिच्चकास्तीह निहारमण्डली ।
क्वचित्स्थली रौप्यमयीव संसदे
कृता विधात्रास्ति च सा मनोहरा ॥

---

१. काश्मीरदेशो भूस्वर्ग इत्युच्यते । २. विल्हणनामा सुप्रसिद्धो महाकविः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

किमूष्मरश्मेः[1] प्रखरैः करैरियं
दिगन्तविस्तारितुषारसंहतिः ।
प्रतीयते क्षीरसमुद्रवत् सितः
सुधानिधिर्वाऽमरवर्गदुर्लभः ॥

(७)

स्थिता महाकाशविलम्बिनोऽचलाः
पयोऽवदाताः परितः समासते ।
स्खलज्जलास्तद्धिमसंहतेस्तपा-
गमे समायान्ति सरिद्वरा द्रुतम् ॥

(८)

क्वचिद् द्वयोः पर्वतवर्ययोर्द्वयो-
र्वहत्यजस्रं हिमनिर्झरः क्षरन् ।
क्रमादसौ निर्झरिणीति सम्भवे-
दुपत्यकायां बहुमानलम्बिनी ॥

(९)

वसन्ति मुस्लीमजना अनेकशः
क्वचित् क्वचिद् वाऽधिवसन्ति हिन्दवः ।
द्वयोर्वरेण्या वरिवर्त्ति संहतिः
स्थितिर्हि काश्मीरभुवो महीयसी ॥

(१०)

विराजते श्रीः परितो महामहा-
वनस्पतीनां चिरशाद्वला सती ।
सुखी वसन्तः प्रकृति-प्रशासकः
समेति सार्धं किमु तस्य बन्धुभिः ॥

---

१. सूर्यस्य ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(११)

विचित्ररावो वनपक्षिसंहते-
र्महाद्रुमाणां विटपेषु सन्ततम् ।
अचिन्तनीयं जनयत्यहो हृदि
श्रुतिप्रमोदं प्रतिनादमेदुरम् ॥

(१२)

अधो नदी पर्वतजा प्रवर्तते
कलं निनादं क्रमशः प्रकुर्वती ।
तदूर्ध्वमाशाकुहरोदरम्भरिः
पतत्रिरावोऽहरहो निशम्यते ॥

(१३)

निसर्गलीला परिदृश्यतेऽथवा
वनेचराणां गिरिराजसद्मनि ।
न दर्शकास्तत्र नराः सकैतवा
विभान्ति ते केवलमेव किन्नराः ॥

(१४)

उपेत्य विद्याधरसुन्दरीगणा
विनष्टशैत्यां गिरिराजकन्दराम् ।
मुहू रमन्तेऽतितरां समं प्रियैः
क्वचिन्मुदा केलिविलासचञ्चुराः ॥

(१५)

तुषारवर्षैः परिक्लिष्टविग्रहाः
क्वचिच्च सिद्धा[1] गिरिकन्दरान्तरे ।
स्वकामिनीभिर्विलसन्ति सम्मदान्-
नितान्तसङ्गीतपराभिरास्थिताः ॥

---

१. गन्धर्वाः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१६)

अरे रमन्तां रमणीयविग्रहाः
सुनृत्यसङ्गीतपरा हि किन्नराः ।
लषन्ति सिद्धाः प्रमदाभिरन्विता
वदन्तु विज्ञा इति हेममन्दिरे[1] ॥

(१७)

प्रकृतिद्वितीया महीयसी
ननु यत्राद्रियते जगज्जनैः ।
किमु तत्र वदानि वस्तुतः
खलु यस्यां विबुधा विमोहिताः ॥

—:o:—

१. हिमालये ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीनगरम्

(१)

मनोहरं श्रीनगरं प्रत्याहि रे
मनोविहङ्गः स्थितमस्ति ते पुरः ।
तदीयदेशं परितो विभात्यसौ
नगाधिपो यत्र सदैव रक्षिवत् ॥

(२)

वदन्ति भूस्वर्ग इतीदमुत्तमं
स्थलं प्रशंसास्पदमेव सत्यतः ।
उदारबोधाः कविराजराजयः
पुरा हि निन्युर्महनीयतामहो ॥

(३)

कवित्वनिष्णातवरा गिरां वरा
निवासमातन्वत यत्र सा स्थितिः ।
प्रसिद्धिमाप्ता हि जगज्जनेषु चेत्
किमस्ति वा साम्यमिहार्पणीयकम् ॥

(४)

क्व हन्त हे विल्हण हे महाकवे !
भवान् गतः क्व क्व च जन्म तेऽभवत् ।
क्व चन्द्रलेखाऽधर[1]पीडनं कृतं
कथं सुधास्यन्दि मरन्दकं त्वया ॥

(५)

क्व सुन्दरी सा वत राजनन्दिनी[2]
मुखश्रिया याऽजयदिन्दुसौष्ठवम् ।
तदीयसम्भोगसुधामवाप्नुवन्
जगज्जिगेथ त्वमनिन्द्यधीः कवे ॥

---

१. तन्नाम्न्या नायिकाया अधरपानम् ।

२. वीरसिंहनामधेयस्य काश्मीरनरेशस्य दुहिता चन्द्रलेखातीव सुन्दरी आसीत्, तदानीं राजप्रासादे गृहशिक्षकत्वेन वर्त्तमानो महाकविर्विल्हणः स्वच्छात्रायास्तस्याः प्रेमपाशेनावद्धोऽभूत्—"चौरपञ्चाशिका"।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

गतः क्व साधारणवीरकेशरी
बभार कीर्त्ति धरणीतले च यः।
यदीयनाम प्रणयोत्सवस्तव
प्रयापयन् भाति चिरं च गौरवम् ॥

(७)

स्मरन्ति विज्ञाः कवितस्करस्य[1] ते
सहेलगुप्तप्रणयं स्वभावजम्।
स वीरसिंहः कुपितोऽपि ते धिया
पराजितोऽभूद् भवते नमो नमः ॥

(८)

गताः क्व रत्नाकर-मंखकादयः
स्वभावसिद्धाः कवयो विचक्षणाः।
स्वजन्मना यामनयन् यशस्वितां
तुषारभूमिं प्रणमामि तां सखे ! ॥

(९)

विना क्व नु श्रीनगरं नरोत्तमाः
समाश्रयेयुः कवयो यशस्विनः ?।
अतो हि मन्ये न्यवसंश्च तत्र ते
सरस्वती-श्रीचरणानुजीविनः ॥

(१०)

दिगङ्गना यत्र निसर्गसम्पदः
प्रसारयन्तीव वदान्यचेतसः।
परोपकाराय सुनीलवल्लरी-
र्विचित्रपुष्पाणि मनोहराणि च ॥

---

२. राज्ञा वीरसिंहेन स्वपुत्र्याश्चन्द्रलेखायाः सतीत्वमपहरन् विल्हणः कवितस्कर इत्युक्तोऽभवत्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(११)

मनोहरे 'डाल'[1] सरोवरेऽतुले
शिलोच्चयानाममलायते छविः ।
किमात्मदर्शोऽमरयोषितां महा-
नसाववाप्तो मुखदर्शनाय वा ॥

(१२)

नवा नवाः स्त्रीसहिता विलासिनः
सरोवरे स्फाटिकवन्[2] मनोहरे ।
सुखेन नावा विहरन्ति सर्वतो
रथेन खे स्वच्छतरे सुरा इव ॥

(१३)

तटद्रुमाः संप्रतिबिम्बिताः स्वतः
प्रलम्बिताः सन्ति सुनिर्मले जले ।
निवारणीयः क्व च चित्तदर्पणे
निसर्गरागो ह्यमले महात्मनाम् ॥

(१४)

शतानि कोला[3] द्वितलालयोपमाः
प्रभासमाना विलसन्ति शम्बरे[4] ।
रथाधिरूढा बहुशो दिवौकसः
प्रयान्ति किम्वाऽमलिने नभस्तले ॥

(१५)

निशात-चष्मासहि-शालिमाच्छविः[5]
कवित्वमुद्भावयतेऽप्यवाचसः ।
अजस्रमावर्जयते निसर्गजा
प्रभा प्रवृत्तिं च सतीं हि चेतसः ॥

---

१. श्रीनगरे शोभमानो 'डाल' नामा सुप्रसिद्धो ह्रदः ।
२. स्फटिकमणिवत् ।
३. नावः ।
४. जले ।
५. 'डाल' सरोवरस्य तटे वर्त्तमानानां निशातबाग-चष्माशाहिबाग-शालिमा-बागनामधेयानां रमणीयानां राजोद्यानानां सौन्दर्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१६)

महम्मदीयोपवनं सुमोत्करै-
स्तनोति शोभां समया सरोवरम् ।
न नन्दनं[1] नन्दयते तथा बलाद्
यथेदमाह्लादयतेतरां मनः ॥

(१७)

तदीयपुष्पोत्करसौरभैर्मुदा
विमुग्धचित्ताः प्रमदा मदान्विताः ।
भ्रमन्ति रम्योपवने सुसज्जिताः
किमिन्दिरा[2] नन्दनकाननेऽथवा ॥

(१८)

सुरालयश्रीः किमु तत्र सर्वतो
मनोहरं श्रीनगरं विराजते ।
ध्रुवं वसन्तः फलपुष्पभूषितो
विभाति वासं विदधन्नरतम् ॥

(१९)

सखे न ! जाने स ससर्ज को महा-
शयो निशातं नयनाभिरामकम् ।
नगाधिराजस्य नितान्तशाद्वले
यदर्थिवत् पादतलेऽवतिष्ठते ॥

(२०)

निसर्गरागग्रहिलाः सुमध्यमाः
सुमोत्करैरारचितप्रसाधनाः ।
तुषारराज्याधिपवन्दनाय वा
भवन्ति सज्जाः किमु कामिनीगणाः ॥

---

१. इन्द्रस्य वनम् ।
२. महालक्ष्म्याः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(२१)

तदेव रूपं प्रतिबिम्बितं जले
सुनिर्मले डालसरोवरस्य सत् ।
प्रतीयते वाऽपरमाप्तवैभवं
सुराङ्गना-श्रीसहितं हि नन्दनम् ॥

(२२)

तदुत्सवोत्साहचणाः पतत्रिणो
मुदा प्रगायन्ति कलं तरौ तरौ ।
हिमाद्रिराजांघ्रितले निवासिनः
कथं सपर्यां न चरन्ति हीदृशीम् ॥

(२३)

तथा हि भृङ्गा मकरन्दलोलुपा
इतस्ततो व्यस्तदशाः सुमे सुमे ।
कथं विजह्यात् प्रणयातुरो युवा
स्मिताननां वः वरवर्णिनीं सखे ! ॥

(२४)

रमन्त आरामपुरे[1] वराङ्गना
मुखारविन्दैः प्रविनिन्दितेन्दवः ।
वरीयसी का सुषमा वनश्रिया
न वेद्मि वा तद्युवतीजनस्य वा ॥

(२५)

अशेष-सौन्दर्य-विमुग्धचेतस-
श्चिराय मे चेद् भवितेह संस्थितिः ।
अथोत्तमं वा किमतः परं वद
क्षणक्षयि-क्षोणितलेऽथवा सखे ! ॥

(२६)

काश्मीर-रूपविभवोऽवितथो विभातु
भव्यानुभूतिरधिकाधिकमातनोतु ।
सौहार्द्रमेतु च मुदा सममेतया मे
भूस्वर्गभूतिचय-सञ्चयनाय नित्यम् ॥

—:०:—

१. उद्याननगरे ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कैलाशः

(१)

चल रे मन एलविलालयं[1] चल कैलासशिलोच्चयं द्रुतम् ।
परिवर्त्ति युगे युगेऽलकाऽप्सरसां यत्र मनोहरा पुरी ॥

(२)

ननु यत्र पुलिन्दनन्दनो[2] रमते पुण्यजनेश्वरो[3] महान् ।
न कथं भविता निदर्शनं लघुताया इह वर्णनं मम ॥

(३)

धनमानबलेन मानवो यदि राजा भुवने बुभूषते ।
स्वयमेव सखा पिनाकिनः खलु किम्भूतपदो भवेन्नु सः ।

(४)

न कदापि निवृत्तिमेति मे ह्यलकादर्शनलालसा भृशम् ।
अवसत् खलु यत्र शापभाग् भुवि विद्याधरसुन्दरी[4] सती ॥

(५)

क्व नु दीपशिखा[5]-कविर्गतः क्व च गन्धर्ववधूर्वियोगिनी ।
अनुभूतवती निदारुणं शपनं[6] किन्नरनाथजं च या ॥

(६)

पतिकर्मविपाकमावहत् कथमेषा विरहप्रपीडिता ।
अपराधकृदस्ति कश्चन प्रसहेतान्यतरः कथं फलम् ॥

(७)

न कथं द्रुतमद्रवन्मनो धनदस्यातिभरं प्रपश्यतः ।
विभवो ह्यनुभूतिदारुणः परदुःखे न हि जातु भागभाक् ॥

---

१. कुबेरसदनम् । २. कुबेरः । ३. कुबेरः ।
४. मेघदूतकाव्ये कालिदासेन वर्णिता यक्षकान्ता ।
५. महाकविः कालिदास इत्यर्थः । ६. अभिशापः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(८)

करुणावरुणालयो ययौ जलजाक्षीं प्रति तां बलाहकः[1] ।
अभिनन्दितवांश्च वाक्चयं प्रियबन्धोरुपहृत्य सादरम् ॥

(९)

भज जैत्ररथं[2] मनोहरं फलपुष्पैः प्रविमण्डितं महत् ।
ध्रुवमत्र कुबेरसुन्दरीकुलमीक्षापरिधिं[3] तवाश्रयेत् ॥

(१०)

प्रतिभाति तुषारवल्लरी-सदनानि प्रकृतिप्रियाणि च ।
द्विजराज-दिवाकर-प्रभा-रुचिराणीह दिवा तथा निशा ॥

(११)

न दिनानि दिनानि तत्र वा क्षणदा न क्षणदास्तथाथवा ।
ननु मर्त्यविचारणा क्वचित् कथमीयाद् रजताद्रि[4]मण्डले ॥

(१२)

अथवाद्रिवरे विराजते ननु यत्र प्रमथाधिपः सदा ।
किमु तत्र वदानि वस्तुतो विबुधानां विषयेऽधिकं सखे ! ॥

(१३)

तुहिनालयराजनन्दिनी प्रतिपत्तुं सुमनोहरं वरम् ।
तप आरभतेह दुष्करं खलु कैलासपतिं पतिम्वरा[4] ॥

(१४)

वरमाप्तुमना उमा मनाक् तपसो न व्यचलत् कदाप्यसौ ।
न च वारणमप्यनुव्रता[5] निजमातुर्वत पर्य्यपालयत् ॥

---

१. मेघः । २. कुबेरस्य उद्यानम् । ३. दृष्टिपरिवेशम् ।
४. कैलास पर्वत मण्डले । ५. स्वयम्वरा ।
५. भक्ता, अनुरक्तेत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१५)

मुनिवद् व्रतमाचरन्त्यहो स्तनसम्बाधनिबद्धवल्कला ।
निषसाद तुषारशीतले पुर ईशस्य शिलातले च सा ॥

(१६)

क्व नु कान्तनितान्तलालसा स्मितहास्योन्मदना हिमाद्रिजा ।
निदधौ स्वशरव्यशङ्करे सुकटाक्षं सुविशाललोचना ॥

(१७)

क्व पुनर्मदनान्तको महान् खलु कैलासपतिस्तताप वा ।
क्व च संपरिदृश्य पार्वतीं सहसा तं निजघान दर्पकम् ॥

(१८)

विननाश यदि स्वयं रुषा रतिकान्तं द्विजराजशेखरः[1] ।
अथ कं पुरुषान्तरं श्रयन् स वराको नु पदं निधास्यते ॥

(१९)

भुवने प्रजनिष्यते पुनर्न शरीरीति विचिन्त्य वा हरः ।
क्षणतः प्रददाह तं नु चेत् कथमुच्येत स शङ्करो विशाम् ॥

(२०)

अथवा स बभूव भूतले विदितोऽनङ्ग इतीव किं ततः ।
शिव इत्यभविष्यदन्यथा कथमुग्रः प्रविदग्धदर्पकः[2] ॥

(२१)

क्व च पञ्चशरस्य पञ्चता[3] विहिता हन्त कृशानुरेतसा[4] ।
प्रियतातिनिदारुणो भृशं ननु कोपस्तरुणीजनेष्वपि ॥

---

१. चन्द्रशेखरः ।
२. महादेवः ।
३. मृत्युः ।
४. शिवेन ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(२२)

क्व च मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥

(२३)

क्व नु सा पुनरेव विह्वला वसुधालिङ्गन-धूसरस्तनी ।
क्व रुरोद च मर्मणाऽऽहता समदुःखामिव कुर्वती स्थलीम् ॥

(२४)

अहह प्रथमाभियाचनां कथमत्यन्तशुचिप्रचोदनाम्[1] ।
विजहौ च भवोऽपि भाविनीप्रवरस्यैव[2] कथं विडम्बना ॥

(२५)

क्व कथं च तयोरपार्थिवोऽघटतोमाहरयोः ससम्भ्रमम् ।
बहुभाव-विलास-शोभितः प्रणयालापमहो[3] मुहुर्मुहुः ॥

(२६)

भववृत्तबुभुत्सया[4] हरं क्व पुराऽस्मिन् रजताद्रिमण्डले ।
परिदृश्य विपर्ययं भृशं प्ररिप्रश्नं कुरुतेस्म पार्वती ॥

(२७)

इत्थं विशालयशसं मनसाऽनुमेयं
देवाधिदेव-मुनिवृन्द - मनोज्ञवेश्म ।
किं वर्णयानि सुतरां रजताद्रिवर्यं[5]
यो मानस-प्रहरिवत् प्रतिभाति नित्यम् ॥

(२८)

वन्दे तमद्रिकुलशेखरमेव रम्यं
यो वज्र[6]मौलिरिव जन्म भुवो विभाति ।
कैलासनाथमधिकं च सदा प्रवन्दे
यस्तत् सरोवर-तट-श्रियमातनोति ॥

—:०:—

१. अतिशयशृङ्गारप्रेरणाम् ।
२. सुन्दरीश्रेष्ठस्य ।
३. प्रेमालापमहोत्सवः ।
४. सांसारिकवृत्तान्तजिज्ञासया ।
५. वरेण्यं कैलासपर्वतम् ।
६. हीरकमुकुटमिव ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मानसं सरः

(१)

रे मानसद्विज[1] ! मनोज्ञतरं प्रपश्य
श्रीमानसं सह उदार कलेवराढ्यम् ।
नानापुराणवचनैः प्रथितप्रमाणं
मानैकसारममरैरुपभुज्यमानम् ॥

(२)

रम्या दिशो बहुलशुभ्रसुनीलवेशा
योषेव दृक्पथमभिप्रतियन्ति[2] नित्यम् ।
यत्र त्विषांपतिविधू प्रतिभात आसां
संवीक्षकाविव दिवि प्रमुखौ च साक्षात् ॥

(३)

हैमह्रदोदक-विपृट्प्रचयैर्दिशान्तः
संदृश्यते सघनकुज्झटिकावदातः ।
न ज्ञायतेऽन्तरमपीह[3] कदापि किञ्चित्
भूस्वर्गयोः परित आवृतदिश्यराश्योः[4] ॥

(४)

क्षीराब्धिवत् प्रविततातिविशालकायं
[5]कासार मेष किमुत व्यसृजद् विधाता ।
कीलाल-केलि-कुतुकार्थमभीच्छुकाना-
मादित्यकिन्नरवराप्सरसां हिमाद्रौ ॥

(५)

भूस्वर्गसारमिति मानसमेतुकामाः
प्रेमानुरक्तमनसोऽमरधामवामाः ।
सज्जीभवन्ति सुतरामहमग्रिकायै[6]
सन्नद्ध-पीवरतर-स्तनकुम्भ-भाराः ॥

---

१. मनोविहग । २. प्रतिगच्छन्ति । ३. भेदः ।
४. मिहितदिग्भववस्तुराश्योः । ५. सरोवरः । ६. प्रतिद्वन्द्वितायै ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(६)

उद्दामयौवनधनाः सुमनस्तरुण्यो[1]
भावप्रसन्नवदनाः प्रतरन्ति वाढम् ।
मुञ्चन्त्य ऊर्ध्वममृतं करवल्लरीभिः
पद्मालये विकचपद्मविडम्बिनेत्राः ॥

(७)

उत्क्षिप्य नीरनिकरं प्रति काश्च काश्चित्
कुर्वन्ति चन्द्रवदनाः परिहासमुच्चैः ।
निर्जित्य सारसकुलं[2] शतपत्रनेत्रैः
स्वीयैः शतानि ललनाः कमलालयेऽपि ॥

(८)

शृङ्गार-सार-सरसीसलिले सलीलं
सन्तीर्य गाढसुखमुत्प्लव[3]माचरन्त्यः ।
क्लान्तिं भजन्ति महिलाः सुरतोज्झितावत्
सानन्दमुग्धनयनाः किमु काश्चनान्याः ॥

(९)

पद्मानि काश्चन वरप्रमदास्तरन्त्य-[4]
श्चिन्वन्त्यमन्दपरिहासपरा मिथो वा ।
का श्रेयसीति सुषमा मुखपद्मयोर्वा
जिज्ञासयेति कमलं परिमान्ति काश्चित् ॥

(१०)

काश्चित्तुरङ्गवदनाः[5] स्वधवैः समं वा
सानन्दकौतुकमथ प्रविधाय रासम्[6] ।
गायन्ति मत्तपिकवन् मधुरं तटान्ते
[7]प्रालेय-शैल-कुहरोदर-पूर्णनादाः ॥

---

१. देवाङ्गनाः । २. पद्मकदम्बकम् । ३. कूर्दनम् ।
४. वराङ्गनाः । ५. गन्धर्वललनाः । ६. केलिविलासम् ।
७. हिमालय ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(११)

नारीस्वभावविहितं प्रविहाय वृत्तं[1]
काचित् पिशाचवनिताप्युपभुक्तभुक्ता ।
कासारकूल इतरा नटति प्रकामं
चीत्कुर्वती सुरत-सौख्यमभिप्रजल्प्य ॥

(१२)

आकर्ण्य घोरतरचीत्कृतिमम्बुमध्ये
भीता भवन्ति वनितास्त्रिदिवस्य काश्चित् ।
भान्तीव सुन्दरतराणि सरोवरे वा
निष्पन्दपद्मसदृशानि मुखानि तासाम् ॥

(१३)

भासन्त आरवमुखाः कलहंसवर्गाः
शुभ्रे सरोवरजले स्फटिकाश्मरम्ये ।
उड्डीय भान्ति मुखरीकृतचक्रवालाः
कारण्डवादिविहगाः खलु खे च केचित् ॥

(१४)

भूस्वर्गमानस इहोन्मदना विहङ्गाः
संलापरावमुखराः प्रतरन्ति केचित् ।
मन्ये तदीय-कलगीत-सुधां पिबन्तो
जीवन्ति ये खलु त एव हि भाग्यवन्तः ॥

(१५)

आसाद्य मानससरः किमु राजहंसा
देशान्तरादधिगतोत्तमवागुदन्ताः ।
कासारवासिविकिरैः[2] सह संलपन्ति
किं किं क्व दृष्टमिति सर्वमदृष्टपूर्वम् ॥

---

१. आचरणम् ।
२. सरोवरवासिविहगैः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१६)

हंसः—

तद्दूरदेशविषयं समवेतुकामां
हंसीमुपेत्य वदतीति स राजहंसः ।
किंवा वदानि सखि ! देशकथां विचित्रां
दृष्टं मया बहुविधं भ्रमणेन यद्यत् ॥

(१७)

हंसी—

प्राणप्रिय ! क्व तव सञ्चरणं[1] सुदीर्घं
किं भोजनं प्रतिदिनं कृतवानसि त्वम् ।
दृष्टा सुचारुगमना क्व च मादृशी का
देशे विदेश उत भारतभूमिभागे ॥

(१८)

हंसः—

वास्तव्यभूमिरधुना विकृताऽस्मदीया
जाता जनैरशनमस्तमितं च दुष्टैः ।
दृष्टा न ते गमनवद् गतिरेव रम्या
कान्तास्वकालजरतीषु च कासुचिद् वा ॥

(१९)

निर्जित्य ते गतिकलां ललनाः स्थिता या
हा हन्त ताः क्व नु गताः सखि नैव दृष्टाः ।
किन्तूपनेत्रवदना[2] विहरन्ति पोटाः[3]
यादूपदा[4] जितचलद्वडवाः[5] प्रगत्या ॥

(२०)

हंसी—

हे कान्त किं मम कृते प्रियताप्रतीकं
आनीतवानसि मनोज्ञतरं पदार्थम् ।
सन्तुष्टये पतिमतेः कुलपालिकायाः
कान्तो हि किञ्चन पुस्कुरुते सहर्षम् ॥

---

१. भ्रमणम् । २. नेत्रकाचमुखाः । ३. पुरुषलक्षणयुताः स्त्रियः ।
४. उपानच्चरणाः । ५. जितधावदश्वाः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA



हंसा॥मुपेत्य वदतीति स राजहंसः ।

Digitized by Sarayu Trust Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(२१)

हंसः—

किं देयमस्ति मम ते प्रियभाषितायै
हार्दं विना वद सखि! प्रणयार्थिनश्चेत्।
साध्वी बिलासमभिवाञ्छति नापि काचित्
प्रेमान्तरा हि रमणी रमणात् कदाचित्॥

(२२)

हंसी—

किं किं च तत्र परिदृष्टमभीष्टमन्यद्
बद्धादरां तव कथासु विदग्ध! नाथ!
आख्याय मां सपदि तोषय तत् समस्तं
का वेत्तुमिच्छति न कान्तमुखाद्धि वृत्तम्॥

(२३)

हंसः—

सर्वं प्रियेऽयि सुभगे! तदहं विमुग्धो
दृश्यं विशालविषयस्य[1] विलोक्य रम्यम्।
हन्तेह लोकचरितं कुटिलं प्रपश्यन्
नीडोद्भवोऽपि हृदये प्रकरोमि दुःखम्॥

(२४)

हंसी—

यत्र स्वयं विदुषवन्द्यपदारविन्दः
श्रीरामचन्द्रनृपतौ रमते स्म राष्ट्रे।
आटीकते[2] नु शठता कथमत्र नाथ!
दुर्नीतिजातमथवा कथमाचरेत् कः॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१. विपुलराष्ट्रस्य। २. अवतिष्ठते।

(२५)

हंसः—

नास्त्यद्य पूतचरितो रघुनन्दनः स
राजा प्रजाहितकरो न च रामराज्यम् ।
राराज्यते स्वहितनिष्ठवरोऽधुनाऽसौ
नेता हि केवलमिहैव शठो वरिष्ठः ॥

(२६)

वर्त्तेत दोषनिचयो यदि राजनीतौ
तेनैव संकलुषितः प्रथमं स नेता ।
को दुर्नयस्य वरटे ! प्रकटेन लाभो
राजा यथा जनपदे हि तथा प्रजाः स्युः ॥

(२७)

हंसी—

सा ब्रह्मपुत्र इति देवनदी प्रयान्ती
राष्ट्रं पुनाति नहि किं परिपूततोयैः ।
तत्तत् प्रदेशजनता न किमाप्तकामा
काम्रं न किं कृषिफलं लभते यथेष्टम् ॥

(२८)

हंसः—

लोका न नाममहिमानमपि स्मरन्ति
लब्ध्वोपकारमपि तत्क्षतिमावहन्ति ।
मन्ये हि सा कलकलच्छलतश्च रोदं
रोदं च बोधयितुमित्युदीर्य सखेदम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(२९)

हंसी—

मेध्यं[1] हि मानसजलं वहतीत एव
सिन्धुः[2] शतद्रुरपि[3] याति सती स्रवन्ती[4]।
तत्तत् पवित्रसलिलैरपि किं न लोकाः
शोकाद् भवन्ति परिपूतहृदो विमुक्ताः ॥

(३०)

हंसः—

दुर्नीतिभीतिवशतः प्रति याति सिन्धुं
सिन्धुः स्वदेशमपहाय तु पाकिमार्गैः[5]।
दृष्ट्वा विशां च दुरितं शतधा द्रवन्ती
निर्यात्यराल-गिरिमार्गपरा शतद्रुः ॥

(३१)

हंसी—

गङ्गा-त्विषांपतिसुतोदक[6]माचमन्तो
नित्यं य एव गुणकर्मपरा भवन्ति।
ते वा कथं नयपथाद्रहिता हि सन्तो
मन्दात्मवज्जगति दुष्कृतिमाचरन्ति ॥

(३२)

हंसः—

देवान् जना जनपदे न च मानयन्ते
देवस्वमप्युदरसाच्च समावहन्ते।
गङ्गाजलं भवतु वा यमुनाजलं वा
किं तेन हन्त! किमहेश्च पयःप्रपातैः ॥

---

१. पवित्रम्। २. सिन्धुर्नाम नदीविशेषः मानससरोवराद् निःसृत्य वहति।
३. शतद्रुनदी अपि सरसस्तस्मादेव निःसरति। ४. नदी।
५. पाकिस्तानदेशमार्गैरित्यर्थः। ६. गङ्गायमुनाजलम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(३३)

हंसी—

तत् किं करोति वद भूतपतिर्हिमाद्रौ
संदृश्य सङ्कटमिदं विकटं जनानाम् ।
संहारको यदि हरो न भवेद् विपत्तेः
प्राणेश ! जीवजगतां कथमीश्वरः सः ? ॥

(३४)

हंसः—

पापप्रवृत्तिमवलोक्य च लोकनाथः[1]
स्थाणुश्चिरं वसति संस्तुहिनाचलेऽसौ ।
विश्वं विहाय सखि ! मानसमागतोऽस्मि
स्वस्थानमेहि विहराव मुदात एव ॥

(३५)

तत्र द्वयं द्वयमतीव सुरम्यरूपा
इत्थं हरन्ति मन उत्तमराजहंसाः ।
सौन्दर्यसारमिदमेव भुवि प्रसिद्धं
मन्ये हि मानसमिति प्रवदन्ति सन्तः ॥

(३६)

मनोविहङ्ग ! स्थगयात्र ते चिरं
मनोरथं मानस एव मोदके ।
भजन्ति विश्राममनेकसारसा
असार-संसारमपास्य यत्र हि ॥

(३७)

तरन्ति हंसाः सरसीरुहप्रियाः
प्रियानुषङ्गग्रहिला जलाशये ।
त एव मन्ये तव सोदरोपमाः
स्वभावशिष्टा हि भवन्ति वस्तुतः ॥

---

१. भूतनाथः शिवः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(३८)

विलासिनः संप्लवने दिने दिने
य आप्तकामाः कमलाकरेऽतुले।
त एव सञ्जीवनवृत्तिवन्धवः
प्रवर्त्तमानाः पुरतो हिताय ते॥

(३९)

शरीर-नीहारशिलोच्चये किमु
प्रशस्त आस्ते हृदय-ह्रदोऽप्ययम्।
निमज्ज रे मानसहंस ! सादरं
सुखी न को वा भवितेह मानसे॥

(४०)

यथेदृशा संप्रतरन्ति योगिनो
न भोगिनां कर्मसु कौशलं पृथक्।
न सत्यमार्गे बहुधा विभज्यते
सतां प्रवृत्तिर्हि निसर्गशिक्षिता॥

काव्यप्रशस्तिः

यत्तत्वं सुनिरूपितं यतिवरैराराधित यद्गणै-
र्यद्रूपं समुदाहृतं प्रतिपद वेदान्तविद्भिर्बुधैः।
वाग्देवी-मुखनिःसृतं महृदयैः संसेव्यते यत् पदं
काव्ये तत् परमं सदा विजयतां सत्यं शिवं सुन्दरम्॥

—:०:—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुद्धिपत्रम्

विषयः	श्लोकः	अशुद्धिः	शुद्धिः
मानसम्	७	स्पृहालु	विलासि
अर्कक्षेत्रम्	१	बुध्वा	बुध्द्वा
चिलिका	४	विद्धन्	विदधद्
काश्मीरः	१७	प्रकृतिद्वितीया	प्रकृतिप्रमदा
श्रीनगरम्	१	प्रत्याहि	प्रयाहि
,,	१८	विद्धन्ननारतम्	विदधन्निरन्त रम्
कैलासः	शीर्षकः	कैलाशः	कैलासः
,,	१	एलविलालयं	ऐलविलालयं
,,	३	बुभूषते	बुभूषति
मानसं सरः	२०	पुस्कुरुते	पुरस्कुरुरते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुद्धिपत्रम्

विषयः	श्लोकः	अशुद्धिः	शुद्धिः
मानसम्	७	स्पृहालु	विलासि
अर्कक्षेत्रम्	१	बुध्वा	बुध्द्वा
चिलिका	४	विद्धन्	विदधद्
काश्मीरः	१७	प्रकृतिद्वितीया	प्रकृतिप्रमदा
श्रीनगरम्	१	प्रत्याहि	प्रयाहि
,,	१८	विद्धन्ननारतम्	विदधन्निरन्त रम्
कैलासः	शीर्षकः	कैलाशः	कैलासः
,,	१	एलविलालयं	ऐलविलालयं
,,	३	बुभूषते	बुभूषति
मानसं सरः	२०	पुस्कुरुते	पुरस्कुरुरते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कवेः कृतयः

१. सुरेन्द्रचरितमहाकाव्यम्

राष्ट्रीयस्वतन्त्रतायै आङ्ग्लसर्वकारस्य कुशासनविरोधे आजीवनं कृतसङ्ग्रामस्य हुतात्मन उत्कलीयवीरस्य क्रान्तिकारिणः सुरेन्द्रसायस्य जीवनचरितम् अवलम्ब्य सरलसंस्कृतभाषया विरचितमिदं मनोरमं महाकाव्यम् उत्कलसर्वकारस्य वित्तीयसाहाय्येन प्रकाशितमस्ति। मूल्यम् रु० २४ मात्रम्।

२. रङ्गरुचिरम् (बालानां कृते)

मृदुमतीनां बालानां मनोविज्ञानम् आश्रित्य ४४ कविताभिः सम्बलितं काव्यमिदं केन्द्रीयसर्वकारस्य वित्तीयसाहाय्येन प्रकाशितमस्ति। बालानां कृतेऽतीवोपादेयं, सरलं सुबोध्यं च। संस्कृते [illegible]
संस्कृतप्रेमिणां पक्षे काव्यमिदम् अनायासेन [illegible]
१६ मात्रम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA